# shrI chandra aShTottarashatanAma stotraM

# શ્રીચન્દ્રાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : chandrAShTottarashatanAmastotram

File name : chandra108nAmastotra.itx

Category : aShTottarashatanAma, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : Manda Krishna Srikanth mandaksk at gmail.com

Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca, PSA Easwaran

Latest update : November 19, 2012, May 26, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીચન્દ્રાષ્ટોત્તરશતનામસ્તોત્રમ્

ચન્દ્ર બીજ મન્ત્ર - ૐ શ્રાઁ શ્રીં શ્રૌં સઃ ચન્દ્રાય નમઃ ॥

શ્રીમાન્ શશધરશ્ચન્દ્રો તારાધીશો નિશાકરઃ ।
સુધાનિધિઃ સદારાધ્યઃ સત્પતિઃ સાધુપૂજિતઃ ॥ ૧॥

જિતેન્દ્રિયો જગદ્યોનિઃ જ્યોતિશ્ચક્રપ્રવર્તકઃ ।
વિકર્તનાનુજો વીરો વિશ્વેશો વિદુષામ્પતિઃ ॥ ૨॥

દોષાકરો દુષ્ટદૂરઃ પુષ્ટિમાન્ શિષ્ટપાલકઃ ।
અષ્ટમૂર્તિપ્રિયોઽનન્ત કષ્ટદારુકુઠારકઃ ॥ ૩॥

સ્વપ્રકાશઃ પ્રકાશાત્મા દ્યુચરો દેવભોજનઃ ।
કળાધરઃ કાલહેતુઃ કામકૃત્કામદાયકઃ ॥ ૪॥

મૃત્યુસંહારકોઽમર્ત્યો નિત્યાનુષ્ઠાનદાયકઃ ।
ક્ષપાકરઃ ક્ષીણપાપઃ ક્ષયવૃદ્ધિસમન્વિતઃ ॥ ૫॥

જૈવાતૃકઃ શુચી શુભ્રો જયી જયફલપ્રદઃ ।
સુધામયસ્સુરસ્વામી ભક્તાનામિષ્ટદાયકઃ ॥ ૬॥

ભુક્તિદો મુક્તિદો ભદ્રો ભક્તદારિદ્ર્યભઞ્જકઃ । var ભઞ્જનઃ
સામગાનપ્રિયઃ સર્વરક્ષકઃ સાગરોદ્ભવઃ ॥ ૭॥

ભયાન્તકૃત્ ભક્તિગમ્યો ભવબન્ધવિમોચકઃ ।
જગત્પ્રકાશકિરણો જગદાનન્દકારણઃ ॥ ૮॥

નિસ્સપત્નો નિરાહારો નિર્વિકારો નિરામયઃ ।
ભૂચ્છાયાઽઽચ્છાદિતો ભવ્યો ભુવનપ્રતિપાલકઃ ॥ ૯॥

સકલાર્તિહરઃ સૌમ્યજનકઃ સાધુવન્દિતઃ ।
સર્વાગમજ્ઞઃ સર્વજ્ઞો સનકાદિમુનિસ્તુતઃ ॥ ૧૦॥

સિતચ્છત્રધ્વજોપેતઃ સીતાંગો સીતભૂષણઃ ।

var  ષીતાંગો ષીતભૂષણઃ  var  પીતાંગો પીતભૂષણઃ
શ્વેતમાલ્યામ્બરધરઃ શ્વેતગન્ધાનુલેપનઃ ॥ ૧૧॥

દશાશ્વરથસંરૂઢો દણ્ડપાણિઃ ધનુર્ધરઃ ।
કુન્દપુષ્પોજ્જ્વલાકારો નયનાબ્જસમુદ્ભવઃ ॥ ૧૨॥

આત્રેયગોત્રજોઽત્યન્તવિનયઃ પ્રિયદાયકઃ ।
કરુણારસસમ્પૂર્ણઃ કર્કટપ્રભુરવ્યયઃ ॥ ૧૩॥

ચતુરશ્રાસનારૂઢશ્ચતુરો દિવ્યવાહનઃ ।
વિવસ્વન્મણ્ડલાગ્નેયવાસો વસુસમૃદ્ધિદઃ ॥ ૧૪॥

મહેશ્વરઃપ્રિયો દાન્ત્યો મેરુગોત્રપ્રદક્ષિણઃ ।
ગ્રહમણ્ડલમધ્યસ્થો ગ્રસિતાર્કો ગ્રહાધિપઃ ॥ ૧૫॥

દ્વિજરાજો દ્યુતિલકો દ્વિભુજો દ્વિજપૂજિતઃ ।
ઔદુમ્બરનગાવાસ ઉદારો રોહિણીપતિઃ ॥ ૧૬॥

નિત્યોદયો મુનિસ્તુત્યો નિત્યાનન્દફલપ્રદઃ ।
સકલાહ્લાદનકરો ફલાશસમિધપ્રિયઃ ॥ ૧૭॥

એવં નક્ષત્રનાથસ્ય નામ્નામષ્ટોત્તરં શતમ્ ।

Provided by Manda Krishna shrikanth mandaksk at gmail.com
Proofread by KSR Ramachandran ramachandran_ksr at yahoo.ca
PSA Easwaran

*shrI chandra aShTottarashatanAma stotraM*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*